स्यमरोस्थितिः॥ धिक् श्रीरोकस्पृहन्नाणामनुतस्त्रार्थिनो श्रियः॥ अथ निदर्शना॥ परस्परमसंसर्गी दर्थः संबंधकल्पकः॥ नि
दर्शनामवदेषापदवाक्यार्थतो द्विधा॥ क्रमेण यथा॥ कः सूर्यप्रभवो वंशः क चाल्पविषया मतिः॥ तितीर्षुर्दुस्तरं मोहादु राम ५७

पेनाक्षिसागरं॥ अत्राल्पविषयमन्मतारघूणांवंशावर्णनेनस्यादित्येकोवाक्यार्थः॥ अपरस्तुमोहादुडुपेनसागर
तरणेच्छा। नचोपमानोपमेयभावं विनातयोः परस्परंसंबंधः संभवतीतिउडुपेनसागरतरणमिवमन्यतास्सूर्यवंश
वर्णनमित्युपमायांपर्यवसाने॥ उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसंभवः परागः॥ वात्याभिर्वियतिवि
वर्तितः समंतादाधत्तेकनकमयातपत्रलक्ष्मीः॥ अत्रकथमन्यस्यलक्ष्मीमन्योवहतीत्युपमायांपर्यवसाने। एवमियंम
लापिबोध्या॥ भेदांतरमाह॥ क्रिययैवस्वस्वकारणयोः संबंधायः उपमापरिकल्पकः अवगम्यतेसा अपरानिदर्शना॥ यु
था। अवरुक्ष्वपरस्यासः पतनायेत्यर्थेत्रालिनाशीसन्॥ आपांडुपततिपत्त्रंतरोरिदंवचनंग्रंथेः। अत्रपततीतिक्रियया पत
नाय भवतीति क्रिययासहजगन्नतपदस्थाभिरूपस्यकारणस्यसंबंधः ख्याप्यते। भवान्यस्याप्युन्नतपदस्थामिप्यवश्यपतनाये
त्युपमायांपर्यवस्यतीतिनिदर्शना॥ इयंसंभवत्संबंधेनिदर्शनाभेदः। अथाप्रस्तुतप्रशंसा। समानविशेषणमपि। यत्रसमा
मानन्वत्तमुपमेयं॥ उक्तेनगम्यते। परस्तुपमानेनेतिसाव्योक्तिः॥ तदर्थोपि। प्रस्तुतार्थप्रतीतिफलिका। अप्रस्तुतार्थप्रतीति
रितिलक्षणे। समासोक्तावतिप्रसंगवारणायाधविशेषणे। सर्वत्रप्रतीतिघटितलक्षणेप्रतीतिविषयपरंबोध्यं। तेनविष

सा॰
५८

यस्यैवालिकाकारत्वेन ज्ञानस्यातिशये एतस्यावद्विषयत्वेपि तुल्यप्रकृतेन तुल्यांतरस्याभिधाने चमत्कार इति तद्द
वोदाह्रियते। यथा। आमूलं कवलीकरोषि नलिनीद्वेषानिहेलालसश्चुडातांडविते रकांडकुपितो मत्तोसि लीलास
रः। नायातः श्रुतिगोचरं किमु ततो लीलाद्दलत्क्ष्मागजोद्दानायूथ्यरिरंस कुंभकषणक्रीडाकरः केसरी॥ यथा वा। केना
सीनः स्फुरन्मकरुणेनाकरादुत्कृष्टतल्पविके नैवासमभिलषितः केन देशांतरस्मिन्। यस्मिंश्चित्रवयमरसहोयाहकल्प
वहासांनाक्षिप्रांतर्मरकतमणैलरी ह्मा ह्मापि। यथा वा। अविदग्धवणिग्वीथीधूलीधूसरितोमणिः केनापि पुण्यजन्तुष
विदुषा परिसेव्यते। यथा वा। अनिशं दहति जनाः संततं हालाहलज्वालाः। शिरसि रसायनमेतत्स्करफानिह्योस्म
वैवोमः॥ यथा वा॥ हहो नाराजनविरोयनलारस्मूले कूले पिदिग्धसरितः प्रतिपालितोसि॥ तस्येतदेव फलमघविदाहिश्री राम ५८
लमस्माषितो यदिह वालकलाधिनाथः॥ अथातिशयोक्तिः॥ उपमेयतावुच्छेदकप्रकारकसत्वे सति उपमानता
वच्छेदकप्रकारकोपमेयप्रतीतिः॥ रूपकप्रतीतावतिप्रसंगवारणाय सत्यंतं। इयमेका। प्रकृतस्यैव प्रकृतत्वेन ज्ञानं द्वि
तीया॥ यद्यर्थारोपणेनासंभाविनार्थप्रतीतिस्तृतीया। कार्यकारणयोः पौर्वापर्यासच्चतुर्थी। सा चेयं यथा। कार्यका

एयोः पौर्वापर्यविपर्यासेऽयुगपद्ग्रहणेन वा विपर्यासस्याविद्यमानत्वात्। तत्र प्रथमा साध्यवसाना गौणी पर्यवस्यति
यथा। लतामूले लीनो हरिणपरिहीनो हिमकरः स्फुरन्मुक्ताकारा गलति जलधारा कुवलयात्। धुनीते बन्धूकं तिल
कुसुमजन्मापि पवनो गृहद्वारे पुण्यं परिणमति कस्यापि कृतिनः। यथा वा। उपप्राकाराग्रं प्रहिणु नयने तर्कय मना
गनाकाशे कोऽयं गलितहरिणः शीतकिरणः॥ सुधाबद्धग्रासैरुपवनचकोरैरनुसृतां किरञ्ज्योत्स्नामच्छां लवलिफल
पाकप्रणयिनि॥ द्वितीया यथा॥ तान्यूहाराणि वत देवपदानि येयं सैव स्वभावमधुरा वपदानुपूर्वी॥ यत्नच्चरत्नरदमन्द
स्फुर्यारसोऽयमनादृशो मृगदृशो वनवसो विलासः। तृतीया यथा। उभया यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः
पतेतां। तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः। यत्त्वाद्युपलक्षणं बोद्धव्यम्। यथा। राकायामक
लंकं चेदमृतांशोर्भवेद्वपुः। तस्या मुखं तदा साम्यपराभवमवाप्नुयात्। चतुर्थी यथा॥ हृदयमधिष्ठितमादौ मालत्याः
कुसुमचापबाणेन। चरमं रमणीवल्लभलोचनविषये त्वया भजता। अत एव कैश्चिदुक्तः पूर्वं नामालंकारो नातिरिच्यते
स यथा। यत्रातिप्रबलतया विवक्ष्यते पूर्वमिव जन्यस्य। प्रादुर्भावः पश्चाज्जनस्य तु तज्जनेः पूर्वं॥ यथा। जनमफलमम

भिलषतामाद्दोहृदयते मनोऽभूर्नां गुरुरतिवारप्रसरः पश्चान्मदनानलो ज्वलति॥ समकालोक्तौ यथा॥ समम् एव समाक्रां
तं द्वयं रसगामिना। तेन सिंहासनं पित्र्यम् अखिलं वारिमीडली॥ अथ पश्चिनित्रूपमा॥ साधारणधर्मस्योपमानवाक्य उपमे
यवाक्ये च कथितपरस्परदुष्टतया वाक्यद्वयेन स्थितिर्यत्र सा वक्ताऽनेनावाक्यार्थस्योपमानत्वात्प्रतिवस्तूपमा॥ यथा॥ देवीभा
वं गमिता परिवारपदं कथं भजत्येषा। न खलु परिभोगयोग्यं दैवतरूपांकितं रत्नं॥ अत्र कथमित्यनेन न खल्वित्यनेन
नोक्तिर्निरूप्यते। इत्येकस्यैवानुवर्तितत्वरूपसामान्यस्य शब्दभेदेन द्विरुपादानं। मालारूपाप्येषा बोध्या। यथा। यदि द
हत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः। लवणमंबु सदैव महोदधेः प्रकृतिरेव सतामविषादिता॥ अथ दृ
ष्टांतः॥ अथ विशेषः सर्वं यादृक्कल्पं तो विवक्षितेतरयोः। तादृशाम् अन्यस्य यत्र पुनः सोऽत्र दृष्टांतः। विवक्षितेतरयोः
प्रकृताप्रकृतयोः। यादृग्धर्मयुक्तः तादृशधर्मयुक्तैवाविशेषः ग्रहणाद्दर्थांतरन्यासमाह्नेदः। तत्र हि सामान्यविशेषय
योर्मध्यादेकमुपमानमन्यदुपमेयं। इह तूभयमपि विशेषरूपमिति। केचित्तु वाक्यभेदे सति उपमानोपमेयसाधारण
धर्मयोः सामर्थ्यसमर्थकभावेन तुल्यपदार्थप्रतिपत्तिविषयत्वमिति लक्षणं। आद्यविशेषणं तोपमालंकारेऽतिप्र

संगः एकवाक्यतापन्नपदतः साधर्म्यप्रतीतिविषयत्वाभावात्रोपमासांकर्यमपि। सामर्थ्यसमर्थकतातुल्यरूप
तया विवक्षितासामान्यसामान्येन विशेषाविशेषे। ऐतितेन नार्थान्तरन्यासे अतिप्रसंगः॥ अर्थोऽपि द्विविधः कल्पितोऽक
कल्पितश्च॥ यथालोकं लोलितं किसलयविषवनवातोऽपि मंदं स्मोहयति। तापयति नूरां तस्याः हृदयं तरुजमनवातोऽपि।
द्वितीयो यथा। त्वद्दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितं॥ आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः॥ अथ
दीपकं॥ यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा॥ अनेकवाक्यार्थान्वि
तकारकपरत्वे क्रियापदत्वे च लक्षणं। आदिमध्यांतवाक्यवृत्तित्वेन द्विविधमपि षोढा। यथा। भूष्यंते प्रमदवना निवालपु
ष्पैः कामिन्यो मदमांसलैर्विलासैः। ब्रह्माणः श्रुतिगदितैः क्रियाकलापै राजानः प्रत्यमितवैरिभिः प्रतापैः। तथा बा
ष्पः पथिककांतानां जलं जलमुचामसुः। विगलत्सु नादडपात्रो घोगो महीभुजां॥ तथा॥ नवयौवनमंगेषु प्रियसंगमनो
रथो हृदयेषु। अथ चेष्टासु विकारः प्रभवति रम्यः कुमारीणां॥ तथा॥ निद्रापहरति जागरमुपनयमर्धतमस्तनदहनमसं
तापं जनयति कांतासंगमस्पृहश्च कोऽप्यमनोवेगः। इत्यादिकं दीपकं। एवं कर्मादिषु द्रष्टव्यानि॥ सर्वसर्वं दीपकमेवालि

तवाक्यार्थेन दीपकसंवलितोऽन्तरोत्तरवाक्यार्थोऽपि द्विवमल्कयते तन्मालादीपकं। यथा। संग्रामांगणमागतेन भवता
चापे समारोपिते सप्रामे परिपृथ्वियोऽधिनिवहे सांगुख्यमासादिते॥ कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन
त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयं॥ अथ तुल्ययोगिता॥ प्राकरणिकस्याप्राकरणिकाप्राकरणिकान्यतरस
हृद्धर्मप्रतीतिस्तुल्ययोगिता। तत्र जिन्नले सति तत्क्तत्रसूक्ष्मो धर्मवत्वस्य साद्दश्यपर्यवसायात्र सकृद्धर्मप्रतीतिरिति किरणेन्नो
पमासीकृता। यथा। नेतविवितयत्दयमुरदविरपामसीमो वरित्री मेकः सन्वी नगरपरिघप्रांशुबाहुर्भुनक्ति। आशंसंते सु
रयुवतयो बद्धवैरा हि दैत्यैरस्याधिज्यधनुषि विजयं पौरहूते च वज्रे॥ यथावा। जलनिधिनस्तानाभिमां धरित्रिं वहति भुजंग
विभुवमवत्कत्त्वं यथा॥ [illegible]तिरेकः॥ उपमानात् उपमेयस्याकांक्षितोऽधिकधर्मवत्त्वेन लक्षणं। विभजते। योगुण उपमेये
स्यात्प्रतिपंथी च दोष उपमाने। व्यस्तसमस्तन्यस्तौ व्यतिरेकं विधात्कुरुतः॥ अस्यार्थः। उपमेये गुणः स्यात् उपमाने वा तस्य
गुणस्य प्रतिपंथी विरुद्धो यो दोषस्तौ गुणदोषौ व्यतिरेकं विधाकुरुतः। कथमित्यत आह। व्यस्तसमस्तन्यस्ताविति। तत्र
गुण एवोपमेये न्यस्तस्तेन तत्प्रमाने दोष इत्येकः प्रकारः। तथोपमाने दोष एवेति द्वितीयः। तथोभयत्रोभयन्यासस्त्रिति

प्रकारत्रयी क्रमेण यथा। अखण्डमण्डलः श्रीमानपश्यैष पृथिवीपतिः। न निशाकरवज्जातु कलावैकल्यमागतः।

सकलंकेन जडेन च साम्यं दोषाकरेणकीदृक्कृते। यथा वा। प्रौढिं यत्नांकलासक्षत्थयतु कुमुदं सत्यमथ संवरेण्यानेत्रानै

श्च वियत्रामवत्नु सवित्तुधानस्करा जातथापि। दोषान्वेषीकलंकी सरजडतनुः सत्त्वयः पक्षपातीन त्वं नेत्राः कथं

वा कलय तत्तुलनां राम वंद्येण वंद्यः। तृतीयो यथा। तरलं लोचनयुगलं कुवलयमचलं किमेतयोः साम्यं। विमलम

लिनेन मुखं शशिना कथमेतदुपमेयं। अथाक्षेपः। निषेधप्रतिपादनतात्पर्येण वक्तनीया निषेधेन च वक्तुं निषेधरूपा

क्षेपलक्षणं। यथा। नानीता जनकस्य दीमहेन्द्रपुत्री नो हृतः सपरिकरः सराक्षसेन्द्रः। उद्विप्पस्वयमुपढौकिता न ल

का वेलक्ष्यात्कुशलकथां कथं ब्रवीमि॥ अत्र कथमिलनेन प्राप्तो निषेधः कुशलकथनस्याचाक्षलैमनक्ति। अथ व

क्ष्यमाणविषयोक्तविषयश्चेति द्वेधा॥ तत्र वक्ष्यमाणविषयमुदाहृतः। उक्तविषयो यथा। संतुष्टे तिसृणां पु

रामपि रिपौ कंडूलदोर्मण्डलीक्रीडाकृत्तः पुनः प्ररूढशिरसो वीरस्य लिप्सोर्वरं। यांचादैन्यपराविपस्यकलहाय

ते मिथस्त्वं वृणते रावणमभितो मुक्त्वा निसद्राजीवः कथितः कथ्यतां। अत्र कथमिति निषेधो रावणस्यात उक्ता

सा. नोवाति प्रसिद्धत्वेप्यनन्विताकेविन्तुवस्कप्रसिद्धमिति वा विरुद्धमिति वास्यवचनमात्तिपणा॥ अन्यत्तथा॥ लसिध्येयत्र
६१ भूयात्तस्याहोपदत्वान्तेपलक्षणम् आ ज्ञते देत्प्रसिद्धोदाहरणं। जनयति संतापमसौ वंद्रकला कोमलापिमे वि
61 त्ते॥ अथवा किमत्र चित्रं दहति हिमानी हि भूमिरुहः॥ विरुद्धोदाहरणं॥ नवगणयामि गुणाननलमथवा सकल
पि नैधयस्यां॥ कः खलु कुंभे रंभोमानुमलं जलनिधेरखिलं। परं तु उपमानात्तेपमाक्षेपमाक्रः॥ यथा॥ तस्याश्चेन्मुख
मस्ति सौम्यसुभगं किं पार्वणेनेंदुना सौंदर्यस्य पदं दृशौ च यदि चेत्किं नाम नीलोत्पलैः॥ किंवा कोमलकांतिभिः किस
लयैः सत्येव तत्राधरे हा धातुः पुनरुक्तवस्तुरचनारंभेष्वपूर्वो ग्रहः॥ उपमानस्याक्षेपतः प्रतिपत्तिरिसप्यन्या यथा॥
ऐंद्रं धनुः पांडुपयोधरेण शरद्दधानार्द्रनखक्षताभं। प्रसादयंती सकलंकमिंदुं तापं रवेरप्यधिकं ततान॥ अत्र शरद्वे
श्यैव इंदुनायक इव रवेः प्रतिनायकस्येव ल्पमाना निगम्यंत इति॥ अथ विशेषोक्तिः॥ कारणसद्भावप्रदर्शनेपि का
र्यानभिधानं विशेषोक्तिः॥ अत्राप्रसिद्धकारणे सिध्यतीनविरोधः॥ यथा॥ निद्रामपेयीजितपंकजानामामोदमेदस्वि राम
नि मेचनाहा नसुवतः केन वबद्धनिद्रा वयोमकंठयहणेयुवानो॥ अत्र प्रक्तेत्तोविनिकारणमनुरागादिकमेववक्तीमे ६१

परेतु एकस्य गुणस्य हानेः कल्पनायां साम्यदार्ढ्यं विशेषोक्तिमाहुः॥ यथा॥ निहताखिलतिमिरभरः स्फारस्फुरद्दु
रुत्तरप्रभाप्रसरः। नावोदितस्त्विषा दहनेऽतैलपूरो जगद्दीपः॥ यथा वा॥ भवंति यत्रौषधयो रजन्यामतैलपूराः सुरतप्र
दीपाः॥ अथ विभावना॥ कारणप्रतिषेधेन कार्योत्पत्तिरिति विभावनालक्षणं॥ अत्राप्यलौकिकं कारणमादाय नानुप
पत्तिरिति ध्येयं॥ यथा॥ अस्त्राण्यपि निहंति निशूलैर्नो घ्नतोपि निपतन्त्यनुवेलं। केन हंत कविना तरुहंत्रैर्निर्मितोयमवि
नीतकुठारः॥ अत्र कारणं खलस्वभावादिकं बोध्यं॥ अथार्थांतरन्यासः॥ सामान्यविशेषयोः सामर्थ्यसमर्थकभावो
यत्र सोऽर्थांतरन्यास इति लक्षणं। स चोभयथापि संपद्यते॥ सामान्यं विशेषेण समर्थ्यते विशेषो वा सामान्येन समर्थ्य
ते। दृष्टांते च सामान्यं सामान्येन विशेषो विशेषेण समर्थ्यत इति नातिव्याप्तिशंकापि॥ तत्र साधर्म्येण यथा॥ प्रतिकू
लतामुपगते हि विधौ विफलत्वमेति बहुसाधनता। अवलंबनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि॥ द्विती
या यथा॥ प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने। स्रजं न काचिद्विजहौ जलाविलां वसंति हि प्रेम्णि
गुणा न वस्तुनि। यथा वा॥ वदनत्तरुर्भुजंगैः सिंहीतनयेन पास्यते बिंदुः। तदलेश्यथा विषादैः प्रायो मलिनैः कदर्थ्यते स

सा॰ जनः॥ अथ वैधर्म्येण यथा॥ अभिसारिकाभिरभिहतसकलनिबिडतमानिंघ्नतेक्षितां मुरपि। अनुकूलनया हि नूणो
६२ सकलं स्फुरमभिसुखीभवति॥ यथा वा॥ हृदयेन भिरन्नानां भवति नृणां सकलमेव निरन्तरे। इन्दुरपि तथा हिमनःस्वे हृदय
62 ति तरां प्रियाविरहे॥ अथ यथासंख्यं॥ निर्दिष्टं पनेपासिन्नर्थो विधिविधायपरिपाघा। पुनरपि तन्मानिवन्धास्ते येव तन्स्या
घ यथासंख्यं॥ परिपाटीकवेः क्रमवित्ता। यद्यपि हत मन्मुमतं दृष्टं वायुरिदं गुरूपातकमनुजपशुभिर्निर्मयीदैर्भवद्भिरु
दायुधैः। नरकरिपुणा सार्द्धं सधर्मकिरीटिना मयमहमस्थे हतो मांसैः करोमि दिशावलिं। इत्याहो मन्मथक्रमदोषतुला
भिधानान्न दमावरूथसास्पिनालंकारत्वमर्हति तथाप्येकजातविधाना नानाक्रमाभिधानेऽकिमपि वैचित्र्यमित्यलंका
रत्वे नो क्रमितिभय॥ यथा॥ किं चन्द्रे किं नु रत्नं तिलकमुत तथा कुण्डलं कोऽक्षिगो वा वक्त्रं वा वारिजं वा स्मर फलति भि
पंक्तिनिक्षिप्दिदेहे। ऊर्ध्वं गोलो ललाटेऽथ वा सितहृदके रेनाभिदेशो वदत्वेपायात्तवोत्के विदेसवदन्तु नारिपुर्वर्द्धमानः क्र राम
मेण॥ अथ विरोधाभासः। पार्यं तिकाविरोधे सति पुरुस्फूर्त्तिकविरोधपतीतिविषयत्वं विरोधाभासत्वं। यथा ने ६२
पच्छदन्निर्नसपच्छदत्तिर्विपच्छदत्तिः करवालहूमः। तथापि ते विक्रमभूरिभिपालयताप्रवद्भैःशमितिं करोति। वे

विन्नु। यस्मिन्द्रव्यादीनां परस्परं सर्वथा विरुद्धानां॥ एकत्रावस्थानं भवति समकाले स विरोधः॥ अस्य सजातीयानां
विधीयमानस्य संति चत्वारः। भेदास्तन्नामानः पंचत्वमेतत्रेषां॥ अस्यार्थः। अस्य विरोधस्य सजातीयानां विरोधे संति
चत्वारो भेदाः। यथा द्रव्यविरोधो गुणविरोधः क्रियाविरोधो जातिविरोधः॥ अत एव तन्नामानः। तथा तेभ्यः सजातीयेभ्यो
अन्येषां विजातीयानां पुनर्विधीयमानस्य पंच भेदाः। यथा द्रव्यगुणयोः द्रव्यक्रिययोः। तथा गुणक्रिययोः गुणजात्योः॥
क्रियाजात्योश्चेति॥ ननु स्याद्द्रव्यजात्योरपि विरोधे न षष्ठो भेदः। तस्मात्तन्नित्यमेव द्रव्याश्रितत्वाज्जातेः। एवं नव। यथा
स्फारेन्द्रनीलनीले स्फिग्विशाले भूपमंदिरे। जानीमः सत्यमापन्नं तेजस्तान्तमसा वयः॥ अत्र तेजस्तमसोर्विरुद्धद्रव्य
योरेकत्र राजमंदिरे अवस्थितिरुक्ता। एवमन्यान्यप्युदाहरणानि लक्षणादनुसंधेयानि। केचित्तु विरोधनामानमलंका
रं विरोधाभासाभिन्नमाहुः। तत्र॥ तत्रैवांतर्भावात्। अथ स्वभावोक्तिः। तत्तज्जातिनियतावस्थान्तरनिवेशनधर्मवर्णनं
स्वभावोक्तिः। इयमेव जात्युक्तिरिति केचित्। सा च क्रियावर्णसंस्थानावस्थाभेदाच्चतुर्धा। क्रमेण यथा। कुर्वन्नाभुग्नपृ
ष्ठो मुखनिकटकटिः कंधरामातिरश्चीं लोलेनाहन्यमानस्तुहिनकणमुचा चंचता केसरेण। निद्राकंडूकषायं कषति नि

सा॰ ६२ 63

विडितश्रोत्रशुक्तिस्फारिगलैर्गलत्स्नायलग्नपतत्तुषकर्णकोणनद्धाः खुरेण॥ इयं क्रियास्वभावोक्तिः। वर्णस्वभा
वोक्तौ यथा॥ येषूर्ध्वयवसूचिविस्तृतसुहृद्दायेकेतकायच्छदच्छायासाम्यमृते मृणाललतिकालावण्यभाजो त्वयेपिय
रां बुद्धिं विनः क्षणमथो येनारहारश्रियस्तेमीस्फाटिकदण्डवरजितो जाताः सुधांशोः कराः॥ पश्चोदं वदवाव दं
वितवपुः पश्चार्द्धपूर्वार्द्धमाक्रम्य बोन्नानितपृष्ठनिष्ठितमनाग्भुग्नायलाङ्गूलभृत्। दंष्ट्राकोटिविसंकटास्यकुहरः कु
र्वन्सटामुत्कटामुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी॥ यथा वा। उत्कर्णोयमकाण्डवेडिमपटुस्फारस्फुरल्लो
मरः क्रूराकारकरालवक्त्रकुहरस्तब्धोर्ध्वलाङ्गूलभृत्। चित्रेणापि न शक्यते विलिखितुं सर्वाङ्गसंकोचनाक्रुद्धो लु
ठति गिरिकुञ्जकुञ्जरशिरःकुम्भस्थलस्थो हरिः॥ इयं संस्थानस्वभावोक्तिः॥ अथावस्थास्वभावोक्तिर्यथा॥ अनाकूतैर
प्रियसहचरीणां शिशुतया वचोभिः पातालीमिथुनमथुनासंगमयिते। उपादत्ते नो वा विरमति न वा केवलमियं साम
कपोलौ कल्याणी पुलकमुकुरैर्दन्तुरयति॥ अथ व्याजस्फूर्तिः। निद्रासुखेन स्फूर्त्योपपर्यवसानं स्फूर्तिसुखेन वा निद्रापर्य ६२
वसानं व्याजस्फूर्तिर्व्याजनिद्रेति। क्रमेण यथा। लेनुद्धिद्विपदानिगच्छसि महीसुद्धेघ्ययांतिद्विषस्त्वं वाणान्द्रशापंच

मुंचसि परेषामप्यपत्रपोषात्पापि पाते देवीपतयस्त्वदरीन्निह्नताः स्त्रैमान्रुषीणां पतिनिंदा तेषु कथं स्म किं त्वयि कथं तन्म
त्र निर्णीयतां। यथा वा। त्वत्तः शूरतरं मन्ये भूपतीन्द्र भवद्रिपुं। शाखाश्रयेस्त्वयि संनद्धे समाप्नोत्रैव तेन यः॥ इयमेव वशात्तूणं
माजं निंदा॥ केचित्तु विशिष्टकर्माकरणेन्यकृतेर्थयानिंदासामाजस्कीति रिपिल त्वमंतिनत्रैदधुदाहरणं। वेदवं वसिद्धे
गिरिवक्रवालैर्विभिद्य समैकराः रणताल्लानं। एवंविधं कर्म न तावन्रामस्त्वया कृतं तत्र शुष्यैव गर्वः॥ अथ सहोक्तिः। वस्कवयान्ने
यथा स्वल्पकालयोरेकपदाभिधानं सहोक्तिः। अयं भावः॥ विशेषणपदानां विशेष्यान्वितस्वार्थबोधकत्वे सत्यन्यसर्गिकत्वं। प्रकृ
ते च सहाद्यव्ययपदसमभिव्याहारविशेषसहकारेण परार्थप्रतियोगिकान्वयप्रतिपादनमिति त्रय प्रतियोगिकस्वार्थ
चयबोधकत्वमिति॥ यत्रैकस्य प्राधान्येनापरस्य गुणीभावेन नैकधर्मान्वयित्वं तत्रायमलंकार इति पर्यवसितोर्थः॥ तेन चैत्रमै
त्रौ सह पचत इत्यत्र नातिप्रसंगः॥ समुच्चये द्वयोरेव प्राधान्यान्नात्र प्रसंगः। यथा॥ सहादिचसमणिसाहिंदी हरासासहै
मरमणिवलएहिं वाहयारा गलंति। स्फुहच्चन्तुहदिविं एती अजवेवराए अहह हत एन दाए दुव्वला जीविदासा। यथा वा
अस्मै मास्यान्यपातः सह रिपुभिरयं संक्षिप्य तांबलानि॥ अथ विनोक्तिः॥ प्रस्तुतस्यान्यसंनिधिप्रयुक्तशोभनाशोभनत्वे

सा.
६४

यथा॥ ञातकुंभमयकुंभकेतुनावाहिनीञाकविनाविनाकथं॥ श्रीमुकुंदस्तपतेर्महामतेः कीर्तिर्निरर्गलकलाविजृंभितं॥
इयंच विनाशब्दमंतरेणापि दृश्यते॥ यथा॥ निरर्थकं जन्मगतं नलिन्या यया न दृष्टं तुहिनांशुबिंबं॥ उत्पत्तिरिंदोरपि निः
फलैव दृष्टा प्रहृष्टा नलिनी न येन॥ अथ परिवृत्तिः॥ अर्थविनिमयः परिवृत्तिलक्षणं॥ विनिमयश्चार्थयोस्त्यागपदानमादानं
च॥ सा च चतुर्धा॥ उत्तमेनोत्तमस्य न्यूनेन न्यूनस्य उत्तमेन न्यूनस्य न्यूनेनोत्तमस्येति॥ यथाक्रममुदाहरणानि॥ आदाय क
र्णकिसलयमियमस्मै चरणमरुणमर्पयति। उभयोः सदृशविनिमयादन्योन्यमवंचितमन्ये॥ यथोवाच्यनेनसर्वार्थिलो
तार्थता कृता हृता। स्थितिं नौ कामगवीसुरद्रुमो॥ मिथः पयः सेवनमपल्लवाशानेन प्रदाय दानव्यसनं समाकृतः एवमन्यान्यपि उदा
हरणान्यनुसर्तव्यानि॥ अथ भाविकं॥ भवत्र्मानस्यापि अर्थस्य वर्णनाद्वचात् साक्षादिव क्रियमाणत्वं तत्। यथा॥ अनात
पत्राप्ययमत्र लक्ष्यते सितातपत्रैरिव सर्वतोवृतः। अचामरोप्येष सदैव वीज्यते मनोज्ञवालव्यजनेन कोपि यः। केचित्तु
अतिरूढस्य च स्फुटो भावो भाविकं। यथा॥ मनोहरिणवाऽयुरासकलने च मीनाः स्त्रियाः तिपुलिने हारिस्मरणाकृत्य राम ६४
कायाइतीति। कथापि गदिते सति व्रजपथांतराले भवत्युत्कः सखि सखि प्रियेव नवलेति कोलाहलः॥ अथ काव्यलिंगं॥

हेत्वभिधानं काव्यलिंगमित्यर्थः ॥ अभिधाने चैव जनौ ॥ अत एव पंचम्या हेतुत्वप्रतिपादनेनायमलंकारः ॥ उपात्तस्यैव प्रक
रणाद्विवक्षाहेतुत्वावगमे एव शोभाविशेषानुभवात् ॥ हेतुत्वं च तादृशस्य न क्रियानुकूलत्वात् ॥ तत्र पदार्थस्य वाक्या
र्थस्य वा ॥ पदार्थस्याप्येकस्यानेकस्य वा ॥ क्रमेण यथा दृशो दग्धं नगरं नगरे च त्वरे पानगोष्ठ्यामनुन्मत्ते च भ्रमति भवतो व
ल्लभा देवकीर्तिः ॥ विष्टब्धं तैः परस्य हृद्गतैः किं तु नाहं समर्थस्त्वल्लीस्यानुप्रकृतिसुखवरोदात्तिणलस्वभावः ॥ अत्र त्वल्ली
स्थितस्य सामर्थ्यं प्रकृतिसुखवरत्वं पदार्थो हेतुः ॥ पातकमवयवत्वममसूयः पुण्यपुंजमपि नाथ तु नो हि ॥ कांचनीमवलेनोह
मरवाशुष्कलतायद्विषदेन विशेषः ॥ अत्रानेकार्थवाक्यार्थः पुण्यपुंजमयीमादौ हेतुः ॥ रोषात्कुंचितपाणिपल्लवनमासे
वांजलिर्निष्कितसमश्वेकांगतया वनोन्नतिर्विघ्नारिनाशेन तुना ॥ नार्फ्रिं विरूद्दितं च मूकपदवीं च के क्रोध्येग तेपार्वतमाःस
फलेव मानपदवी पाया त्रिलोकीतले ॥ अत्र पार्वतीमानसापत्न्ये सवांजल्यकरणरूपाः पदार्था हेतवः ॥ अथ पर्याये
कं ॥ वा यत्नाच्छेदके विना प्रकारान्तरेणैवाभार्थस्य भंजनयायत्प्रतिपादनं तात्पर्येण प्रकारान्तरेण कथनं तत्पर्यायो
क्तं ॥ यथा ॥ राजन्राजसुता सिनिशां रिपुवैद्यानि विडनिगडश्चाष्टेन । तेनैव यं ततरितः कलकलो वै दिष्टं दस्य ॥ अत्र रिपुस्त्रि

स्मा. योवैदीन्नताइतिपर्यायोक्तं॥ अथोदात्तं॥ उत्कर्षयोगित्वेलक्षणं॥ सर्वोत्कर्षःनिमित्ताधीनः॥ निमित्तेनैवसंपा
६५ वीर्यवा॥ क्रमेणयथा॥ टंकच्छेदपरंपराविदलितेयत्कांचनीयावलेविंतावंबलमावमंवतिपरंस्वर्लोकिलोकाधि
ना॥ इत्थंयोदृढदयावताघमवत्ताविंतेविधिंत्सध्विजद्वारिद्वारिहहेहेप्रकटितानैकैस्कवर्णावलाः॥ तथाश्रंगःप्रो
65 न्मूलितांगःकलयतिसहसासंगमासातुवंघ्रैतैलंगोरंगभूमौस्फुरपतितरुणीसंगमंगीचकार॥ वंगःसांगोयमास्ते
कलितनिजवधूकैकणःकुंडिनेशोवैदर्भोदर्भेदूडाकथितनिजवलोमातिकष्मलतायात्॥ अथसमुच्चयः॥ उतरा
नपेक्षसाधकतापर्यभिन्नफलजनकतयातत्पारिस्पार्द्धभावेनोपात्तत्वंतत्वं॥ नवसमाधिसांकुर्याशंका॥ अत्रएकैक
स्यापरनिरपेक्षकार्यकारित्वंसमाधौत्तुपरस्परसापेक्षत्वमितिभेदात्॥ अयंचसद्योगेअसद्योगेसदसद्योगेच॥ य
था॥ दुर्गंत्रिकूटपरिखापयोधिःप्रभुर्दशास्यःस्फटाश्चराक्षसाः॥ नरोपियोद्धासविबैःप्लवंगमैःकिमत्रचोद्यंहासप
दंपदंमहद्भयं॥ यथावा॥ श्रीहर्षोनिपुणःकविःपरिषदप्येषागुणग्राहिणीलोकेहारिचवत्सराजचरितंनाट्येचद राम
क्षावयं॥ वस्त्वैकैकमपीहवांछितफलप्राप्तेःपदंकिंपुनर्मद्भाग्योपचयादयंसमुदितःसर्वोगुणानांगणः॥ असयो ६५

गेयथा॥ क्लीबो विरूपो मूर्खश्च सर्वमहामत्सराचितः। निर्धनोपि करोत्येष मनुष्याहि कृतिं जनः॥ सदसद्योगे यथा॥
शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः। प्रभुर्धनपरायणः सततदुर्गतिः
सज्जनो नृपांगणगतः खलो मनसि सप्त शल्यानि मे। एष द्रव्यगुणक्रियासमुच्चयभेदात्त्रिधा। यथा॥ स्फुरत्स्मितदमेता
वद्दिहस्फारस्फुरदिंदुमंडला रजनी। सोच्चतलं काव्यकथा सुहृदः स्निग्धा विदग्धा दृश्या॥ एष द्रव्यसमुच्चयः। एवं गुण
क्रियासमुच्चययोरुदाहरणं वाच्यं। जातिसमुच्चयश्च न विद्यते। न ह्येकत्रानेका जातिः संभवति॥ अथ पर्यायः॥ ए
कस्यानानाधिकरणोत्पत्तिकत्वं नानाधिकरणस्थितिकत्वं वा लक्षणं। तत्र प्रथमः [illegible] विलेनैक विशोढौ कृतो वेत्यन्य
देतत्। यथा। नन्द्याश्रयस्थितिरियं तव कालकूट केनोत्तरोत्तरविशिष्टपदोपदिष्टा। प्रागर्णवस्य हृदये [illegible]
[illegible] कण्ठेऽधुना वससि वाचि पुनः खलानां॥ तथा॥ [illegible] परिवर्तितो [illegible] निम्पतुरसूनुसुतासुने॥ वल्लकी
वहृदयंगमस्वनामंजुवागपि च वामलोचना॥ अथानुमानं॥ वस्तु परोक्षं यस्मिन्साध्यमुपन्यस्य पुनः साधकं तस्मात् पु
नरन्यादुपन्यस्येद्विपरीतं वैतं तदनुमानं। तदर्थोपि साध्यसाधननिर्देशात्त्वात्त्वाद्विविधमचयवाप्तिकत्वमनिरेक

मा· ६६ 66

व्याप्तिकत्वमन्वयव्यतिरेकव्याप्तिकत्वमिति ॥ यथा सानुत्तमागमिष्यन्न निपतितोऽसि पादयोस्तस्याः ॥ कस्यमन्यथा ललना
रेपावकरसलिलकपंक्तिरियं ॥ यथा वा ॥ ववनमुपवारुगर्भे हरादुत्तमनमोसनंकेसेलं ॥ इदमघमयि तथा ते यथा ॥ सि
न्दूरं प्रियेकुपिता ॥ अत्र वक्ष्यमाणसलेपिकपौढोक्तिसैव तथाभिधानमिमलंकारत्वं ॥ अन्यथा वक्रिमान् सूसा
क्ष्मत्राप्यलंकारतापत्तेः ॥ अथ परिकरः ॥ साभिप्रायैः सम्यग्विशेषणैर्वस्तु यद्विशिष्यते ॥ द्रव्यादिभिर्बहुभिन्नः स्वंत्वेवि
धः परिकरः स इति ॥ साभिप्रायैरित्यनेन वस्तुस्वरूपस्थितिपादकानां भूर्जलवदः कुंजरविंदुशोणद्रसादीनां विशेषणा
नां व्यावृत्तिः ॥ एतत्वर्थोऽपि ॥ विशेष्योत्कर्षप्रजनकनानाविशेषणोपादानमेव लक्षणं ॥ यथा ॥ कर्मीघूर्णतकुलानां जंतुस्तम्
पनादीपनः सोऽभिमानीक्लसाको बोनरीयमपनयनपटुः पांडवायस्य दासाः ॥ राजा दुःशासनादेर्गुरुरनुजशतस्यां
गराजस्य मित्रं क्वास्ते दुर्योधनोऽयं न मोसौ कथयत परुषे द्रष्टुमभ्यागतोस्वः ॥ एष द्रव्यपरिकरः तथा ॥ अनेनैश्वासहपार्थिवे राम
न रंगोरुकविन्यनसो रुचिमं ॥ शिथातरंगानिलकंपितासु विहर्तुमुद्यानपरंपरासु ॥ अत्र नृपस्यानेनेति पदप्रतिपा ६६
दितस्य मुक्तापार्थिवेनेति विशेषणमेवं परिकरः स्तः ॥ एष गुणपरिकरः ॥ तथा ॥ योसौ क्रीडति दुर्दिने मदिनमानेये

तमर्थ्यंत्वयस्माकाराम्यथयपचनेंभवनयन्त्रेत्र॥एवंपर्यंकयन्त्र।वाहोपाधिपराक्रमखायमनसीनिःसीमसेसीव्यतेस्तूनो:
साहसकोद्यालेकगुरवेभावायतस्मैनमः॥एषक्रियापरिकरः॥लोकत्रजिघोदिविवादितेमात्रथादितेयेषुमहान्मरे
न्द्र:॥किंकर्तुमर्थीयदिसोपिरागान्नागान्निकहाकिमतःपरापि॥एषजातिपरिकरः॥अथव्याजोक्तिः॥तत्त्वेवतुगूहितो
र्थनिगूहनत्वंनिगूढत्वमात्रंअपह्नुतेरोपसक्तमितिवेत्॥उच्यते॥उपमानप्रकरणेपाठात्उपमेयमसंदिग्धत्वात्उप
मानंसत्यंतयामवस्थाप्यतेतत्रापह्नुतिःनयप्रह्नुतेतथेतितात्पर्यं॥किंचोपह्नुतेर्निषेधगर्भत्वादस्यास्तुतथाभावात्
नहिदास्यमानोदाहरणेरोमोचादिकेनिषिध्यात्किंविधीयते॥किंतुतस्यासहेतुकत्वेविधीयतेपार्वतीस्पर्शजन्य
त्वनिक्रवायेतिभेदः॥यथा॥शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमांचादिविसंस्थुलाखिलविधिव्यासंग
भंगाकुलः॥हाशैत्यंतुहिनाचलस्यकरयोरित्यूचिवान्सस्मितेशैलान्तःपुरमातृमण्डलगणैर्दृष्टोवताद्धःशिवः॥अथ
परिसंख्या॥अन्ययत्योहायकीर्तनेलक्षणे॥परिवर्जनायसंख्याकथनेपरिसंख्येतिसमाख्यावलादपिलक्षणलाभ
ः॥तत्कथनंप्रश्नपूर्वकंप्रश्नापूर्वकं।यथाकिंसुखमपारतेत्रोकिंधनमविना।किंनिर्मलाविद्या।किंकार्यंसंतोषोवि

सा॰
६७

यस्य महेच्छता राज्ञः ॥ पश्चात्पूर्वकं यथा कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते काठिन्यं कुचयुगले तरलत्वं नय
नयोर्वसति ॥ अथ कारणमाला ॥ उत्तरोत्तरं प्रति पूर्वपूर्वहेतुत्वाभिधायकमिदं लक्षणं यथा विनयेन भवति गुणवा
न्गुणवति लोकोनुरज्यते सकलः । अभिगम्यतेनुरक्तो ससहायो युज्यते लक्ष्म्या ॥ अत्रैव यथा वा हेतुर्नामालंकारोभिन्न
मूर्तिः इति प्राञ्चस्तन्न साधीयः । लक्षणवैलक्षण्यात् यथा । हेतुमता सह हेतोरभिधानमभेदकृद्भवेद्यत्र ॥ सोलंकारो हेतुः
स्यादन्येभ्योसौ पृथग्भूतः । यथा । अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ॥ रम्योयमेति सम्प्रति लोकोत्कं
ठाकरः कालः ॥ यथा वा ॥ आयुर्घृतं नदी पुण्यं भयं चौरः कृशं प्रिया । वैरं द्यूतं गुरुर्ज्ञानं श्रेयो ब्राह्मणपूजनं ॥ अथान्योन्यं ॥
यत्र परस्परमेकः कारकभावोभिधेययोः क्रियया । संजायते स्फारिततत्त्वविशेषस्तदन्योन्यं । वस्तुतस्त्वेकसजातीयक्रि
यासुखेन द्वयोः परस्परोपकारकत्वं लक्षणं ॥ यथा ॥ कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ॥ अ
न्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः । यथा वा रूपं यौवनलक्ष्म्या यौवनमपि रूपसंपदस्तस्याः ॥ अन्योन्यम राम
लंकरणे विभाति शरदिन्दुसुन्दरयोः ॥ अथोत्तरं ॥ उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानां । क्रियते तदुत्तरं स्या ६७

स्मादपह्नुत्यनेयत्र ॥ अन्योन्यनायको नरत्नमेकैलक्षणं ॥ अथ आपूर्वकलोकातिक्रांतासङ्गुत्तरत्वे द्वितीयलक्षणे
क्रमेण यथा ॥ गम्यतामन्यतः पांथ तवेह वसतिः कुतः ॥ दोषाय यस्मात् हृत्ये न वसतिः प्रोषितालये । मोऽस्ताहि गिरि वा संदेही ति
यावत् कस्यचिद्वचनमनुमानवाको नो नीयते ॥ तथा ॥ किं स्वर्गादधिकसुखं वैकुसुहृत् तस्मिन्नेते लक्ष्मीः । सो रागस्य मृदुर्मि हृ
सत्काव्यरसामृतस्वादः ॥ अथास्य प्रश्नपरिसंख्यायाश्च को विशेषः ॥ उच्यते ॥ तत्र नियमप्रतीतिरत्र तु प्रश्नोत्तरमात्रे
न तु नियमधीः ॥ अथ सूक्ष्मं ॥ कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते ॥ कु
तोऽप्याकारादिंगितादा । यथा । वक्त्रस्यन्दिस्वेदबिंदुप्रबंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे पुंस्त्वं तन्व्या व्यंजयंती वयस्या स्मित्वा पा
णौ खड्गलेखां लिलेख । तथा कांते कांते कनकजंबीरं करे किमपि कुर्वति ॥ आगारलिखिते मानौ बिंदुमिंदुमु
खी ददौ ॥ अथ सारः ॥ यत्र यथा समुदायाद्यथैकस्योत्कर्मेण गुणं वदंति ॥ निर्धार्यते परावधि निरतिशायं तद्भवेत्सारं ॥
तत्रैव पूर्वपूर्वापेक्षातो नरोत्तरोत्कर्षविश्रांत्यधिकरणं लक्षणे ॥ यथा ॥ भोजनं भूषणमवनाकरकमलावर्तितेति दुग्धाब्धे
हलीत हलीकारसार हलीकारस्य शर्करासारः ॥ अथासंगतिः ॥ विरुद्धे समकाले कारणमन्यत्र कार्यमन्यत्र । भवति ॥

सा॰ ९८

सहृदयानुगुणं विज्ञेयासंगतिः सेयं॥ कार्यकारणयोर्भिन्नदेशत्वे लक्षणे तेनकालविपर्ययात्मकातिशयोक्तितो
भेदः।यथानवयौवनेनस्फुतनोरिंदुकलाकोमला निष्कूर्यंते॥ अंगान्यसंगतानां सुभ्रूणां हृदि वर्द्धते कामः॥ अथ समाधिः
कारणांतरयोगतः कार्यस्य सुकरत्वं लक्षणं।नवसमुच्चयेत्रातिव्याप्तिः॥ तत्रैकस्यापरनैरपेक्ष्येण कार्यपर्याप्तत्वादि
हेतु परस्परापेक्षितकार्यकारित्वमिति निर्भेदात्॥ यथा॥ मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः॥ उपकाराय दिष्ट्ये
दमुदीर्णं घनगर्जितं॥ अथ समं॥ द्वयोर्योग्यतया संबंधे च संभावने लक्षणं॥ तत्रोत्तमपथा॥ उत्कृष्टयोरपकृष्टयोर्वा॥ यथा॥
निशाशशांके शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः॥ विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय।
तथा॥ क्रमहद्विचित्रमेतत्सुचरितरचने विधिरचतुरः॥ आस्वाद्य निंबफलं तस्य पदास्वादकः काकः॥ अथ विषमं॥ वि
रूपधर्मीभ्यां संबंधायोग्यत्वे निर्दिश्यारसे च॥ अभीष्टफलालाभे द्विष्टफललाभ इति द्वितीयं॥ कार्यकारणगु राम
णयोर्विरोध इति तृतीयं॥ कार्यकारणक्रिययोर्विरोध इति चतुर्थं॥ क्रमेण यथा॥ शिरीषादपि मृद्वंगी क्वेयमायतलो ९८
चना॥ क्वायं क्व कुकूलाग्निकर्कशो मदनज्वरः॥ तथासिंहिकासुतवित्रस्तः शशः शशांकं समाश्रितः। जग्रसे साश्रयं तत्र

तमस्तुः सिंहिकासुतः ॥ तथा ॥ सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ॥ तमालनीला शरदिन्दुकां
न्तिर्यशस्त्रिलोकाभरणं प्रसूते ॥ तथा ॥ आनन्दममन्दमिमं कुवलयलोचने ददासि त्वं । विरहस्त्वयैव जनितस्ताप
यति तरां शरीरं मे ॥ न चात्र विरोधाश्रयसंगतिवास्यादितिवाच्यं ॥ विरोधस्याविवक्षितत्वात् । कार्यकारणरूपतानु
कारस्यैतिध्येयं ॥ अथाधिकं ॥ आश्रितमहत्वादाश्रयमहत्वं ॥ आश्रयमहत्वादाश्रितमहत्वं वा यत्र तथाप्यधिकत्वं
मन्यते ॥ तथा ॥ अहो विशाले भूपाल भुवनत्रितयोदरे । माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ द्वितीयं यथा ॥
युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत । तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा
मुदः ॥ प्रथमोदाहरणे अहो विशाल भित्यादौ मानाशक्य यशोराशेरधिकतया आधारस्य महत्वं प्रतीयते । पर्यन्ति
वयशोराशेर्विशालतापरत्वमित्येकमधिके ॥ द्वितीये तथा विधे वपुषि मानात्मा वामुदामयमहत्वे ॥ उभयत्रैव वस्तू
प्रकर्षतात्पर्यमितिध्येयं ॥ अथ प्रत्यनीकं ॥ वक्तुमुपमेयस्तु तमस्तुपमानेन जिगीषया यत्र । तस्य विरोधीत्युक्त्वाकल्प
न प्रत्यनीकं तत्तदर्थोऽपि प्रतिपक्षं तिरस्कर्तुमसमर्थेन तदीयपक्षे लेपात तदीयस्य तिरस्कृतिः प्रत्यनीकं ॥ यथा यस

सा॰ किंचिदपकर्तुमक्षमः कामनिग्रहगृहीतविग्रहः ॥ कांतवक्रसदृशाकृतिं कृती राहुरिंदुमधुनापि बाधते नन्वि
६९ स्वदीयत्वाभावात्कथं मालादीपकमिति चेत् ॥ उच्यते ॥ सा ह्युत्तरोत्तरं परया वात्र दीपकत्व एव विवक्षितत्वात् ॥ अथ मालितं
69 एकेनाम परस्यालिंगनवइतिलहणे ॥ अभिनवस्थवलवत्समजातीयग्रहणे कृतानुग्रहणे ॥ नवधिया ॥ सहजन्मणा
नुकेन वा ॥ यथाक्रममुदाहरणं ॥ अपांगतरले दृशौ मधुरवक्रवर्णा गिरो विलासभरमंथरा मतिरतीव कांतेषु
इति स्फुरति मे गके स्मृगदृशो स्वतो लीनया तदत्र न मदोदयः कृतपदोपि संलक्ष्यते ॥ तथा ॥ मल्लिकामालभारिण्यः सर्वां
गीणार्द्रचंदनाः ॥ क्षौमवत्यो न लक्ष्यंते ज्योत्स्नायामभिसारिकाः ॥ अथैकावली ॥ एकावलीति सेयं यत्रार्थपरंपराया
लाभै ॥ आधीयते यथोत्तरविशेषणत्वेनापोहस्थितिर्विधाने ॥ अपोहो निषेधः ॥ पूर्वं पूर्वं विशेष्यमनूद्य विशेष
णं विधीयते । उत्तरोत्तरविशेषणेन पूर्वपूर्वविशेषणं निषिध्यते वा सैकावली ॥ क्रमेण यथा ॥ वने वने यत्र वसंतवल्ली
वसंतवल्लीषु सुमभृत्प्रतानाः । मधुव्रतानालिसुमनोज्ञनादा मनोज्ञनादे सुमनांसि सूते ॥ यथा वा सलिले विकासिकमले राम
कमलानि सङ्गीपिमकसस्त्रवाणि ॥ मधुलीनालिकुलाकुलमलिकुलमपि मधुररणितमिह ॥ तथा ॥ न तद्धनं यत्रं मा ६९

ने॰

च्छवीलतानमालतायञ्चनमञ्जुमञ्जरी॥नमञ्जरीसानवयत्रसौरभंनसौरभंतत्रचनयत्रषट्पदाः॥नचात्रकारणमा
लाशंका॥कार्यकारणभावेतात्पर्यविरहात्॥किंतुविशेषणविधौ॥केचित्तुकारणमालायांपूर्वस्योत्तरंप्रतिहेतुताय
हेतुत्तरस्यपूर्वंप्रतिविशेषणतायाःस्थापनमितितद्भेदः॥अथस्मृतिः॥वक्ष्येविशेषदृष्ट्याप्रतिपन्नास्मरतिर्यत्रतत्स
दृशी॥कालान्तरानुभूतवस्त्वन्तरमिमदःस्मरणं॥तत्सदृशमितिविशेषणेनतद्दोषवशादन्यथास्मरणेनातिव्याप्तिः॥स्म
रतीस्तनेनानुभवेनातिव्याप्तिः॥नचावतित्तद्वयेवैविशेषवर्णितेवेल्लत्सत्वेनेष्टापत्तिः॥अथनाप्तिवेद्वैविशेषाभावादेव
नालंकारतेतिवाच्यं॥लक्ष्यानुरोधेनलक्षणव्यवस्थापनात्॥नहिलक्षणानुरोधेनलक्ष्यव्यवस्थितिः॥अतिव्याप्त्यादीना
मुच्छेद्यापत्तेः॥यथा॥निम्ननाभिकुहरेषुयदम्भःप्लावितंमृगदृशांचलदृशीभिः॥तन्नवेत्कुहूः॥स्फुरन्नायस्यारिताःस्फुरन्कैट
भतानां॥यथावा॥भवनवनेपश्यंतस्थूलस्थूलेन्द्रनीलमणिमालाः॥भूस्वत्रायमभूराःस्मारंसमीरकुलसर्पाणां॥अ
थभ्रांतिमतोऽस्यवक्तोविशेषः॥उच्यते॥तत्रोपमानावगतिरेवनतदुपमेयावगतिः॥इहतूपमानस्मरणेनभ्रांतिरिति॥
अथभ्रांतिमान्॥अर्थविशेषपरस्यत्वगच्छेददर्थमेवतत्सदृशी॥निःसंदेहंयस्मिन्प्रतिपत्तिर्भ्रांतिमान्सइति॥यद्धतस्य

सा· सादृश्यपादप्रकृतमात्रविषयत्वे तत्तोऽधिकरणप्रकारकज्ञानत्वमिति स्पर्धः। तथा चानुभूयमानारोपरूपस्य सामा
७० न्यालंकारस्याप्यत्रैवान्तर्भाव इत्यपि केचित्। यथा। मुग्धा दुग्धधिया गवां विदधते कुंभानधो वल्लवाः कर्णे कैरवशंक
७० याकुवलयं कुर्वंति कांता अपि॥ कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकांक्षया सांद्रा वेश्मसो न कस्य कुरुते चित्त
भ्रमं चन्द्रिकाः॥ अथ प्रतीपं॥ उपमानतिरस्कारः प्रतीपं। तिरस्कारश्चानर्थक्येनोपमानस्योपमेयत्वकल्पनया वा। यथा त्व
ममुद्रा· किं वैदग्ध्यपरं विना हंति नयनानंदं विचलेन किं दर्कं वा कषकेतनस्य कुरुते नालोकमात्रेण किं॥ वक्त्रेन्दौ तव सत्ययं य
दपरः शीतांशुरुज्जृम्भते दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिंबाधरे॥ तथाए हि दावसंहरिकस्पंदहा ऊणस्मण स्मणस्मण
कवअणि उज्जो नुम्मसुहेण किसो अरिवंदो उपमिज्जइ तणेन॥ अथ सामान्यं। प्रकृताप्रकृतयोर्गुणसाम्येन भेदाग्रहे
लक्षणं॥ यथा। नवघनशोणमंडलकोत्तिलिभेजगलसनालसुविशेषहेतौ। मल्लीयमेषा नवमालिकेति विविक्तवित्ती न मने
नकोपि॥ नवमीलितेन समहंसाकर्यशंका॥ तत्र समानधर्मेणान्यदीयेन प्रकृतधर्मनिगूहनं। प्रस्तुते चान्यदीयेन प्रकृत राम
सयोर्भेदाग्रह इति विशेषात्। न च भ्रांतिमता सांकर्यं। तत्र च प्रकृतो भ्रांतिरत्र तु भेदाग्रह इति विशेषात्॥ तत्र स्मरणमाण ७०

रोपः इह तु गृह्यमाणरोपस्य निर्भेद इति केश्चित् ॥ अथ विशेषः ॥ विनाप्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ॥ एकात्मा
युगपद्वृत्तिरेकस्यानेकगोचरा ॥ अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ॥ तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ॥ ए
कात्मा एकस्वभावः । तथा च एकमेव वस्तु एकेन स्वभावेन युगपदेकत्र वर्त्तत इत्यर्थः ॥ तथैवेति ॥ तेनैव प्रकारेण समर्थः ।
क्रमेण यथा ॥ दिवमप्युपयातानामाकल्पमनल्पगुणा येषां ॥ रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वंद्याः ॥ अत्र वा
चामाकाशाश्रयत्वेपि कर्तृनिष्ठतया काव्यविशेषसिद्धिः ॥ तथा ॥ सा वसइ तुह्म हिअए सा च्चिअ अच्छीसु सा अ वअणेसु ॥ अ
म्हारिसाण सुंदर ओवासः कत्थ पावाणं ॥ तथा ॥ स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यं ॥ विधिना स
सृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च ॥ एवं हरणेपि मायुराहृतं गृहिणी सचिवे सखीत्यादि ॥ अथ तद्गुणः ॥ अस
मानगुणे यस्मिन्नतिबहलगुणेन वस्तुना वस्तु ॥ संसृष्टं तद्गुणतां धत्ते वेन्नद्गुणः स इति ॥ स्वगुणपरित्यागेन परगु
णग्रहणं लक्षणं ॥ न च मीलिते अतिव्याप्तिः ॥ तत्र स्वीयगुणाग्रहणेनातत्पर्यभेदेन भेदात् ॥ यथा ॥ उत्फुल्लकमलापि
ञ्जताकारं स्वरमास्वरत्वया केठ ॥ एतत्समानुनिभावं पकरामभ्रमं कुरुते ॥ अथातद्गुणः ॥ संगतं वस्तामपि यो गुणतायं

सा॰ ७१

परगुणग्रहणं लक्षणं॥ परगुणाग्रहणं उभयथा। अप्रस्तुतेन प्रस्तुतगुणाग्रहणं। प्रस्तुतेन वा अप्रस्तुतगुणाग्रहणं। यथा॥
धवलोसि यद्यपि सुन्दर तथापि त्वया मम हृदये रञ्जितं॥ रागभृते पि हृदये सुभग निहितो न रक्तोसि॥ ॥ अत्र प्रस्तुतस्य रा-
गभृतो हृदयस्याप्रस्तुतेन नायकेन गुणो न गृहीतः॥ प्रस्तुतेनाप्रस्तुतगुणाग्रहणं यथा॥ गांगमम्बु सितमम्बु यामुनं कज्जल-
मम्बुमयत्र मज्जतः। राजहंस तव सैव शुभ्रता हीयते न च न वापचीयते॥ अत्राप्रस्तुतस्य गुणः राजहंसेन प्रस्तुतेन न गृहीतः।
राजहंसस्योत्कर्षस्तेन प्रस्तुतता समर्थनीया॥ अथ व्याघातः॥ यद् यथा साधितं केनाप्यपरेण तदन्यथा। तथैव तद्विधीयेत स
व्याघात इति स्मृतः॥ सजातीयकारणेन विजातीयकार्यं लक्षणं॥ यथा। दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः॥ वि-
रूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः॥ एवं निरूपितेष्वलंकारेषु तेषामन्योन्यसंबन्धे वा रूपप्रकर्षदर्शनात् संसृष्टि-
संकरादीनां पृथगलंकारान्तरत्वं॥ उक्तं च॥ प्रोढा नेदाय संसृष्टिर्नानालंकारयोगतः। रविताररत्नमालेव पृथगव-
भासते॥ अलंकारस्यान्तरानपेक्षालंकारान्तरयोगित्वं संसृष्टिः तत्र शब्दालंकारसंसृष्टिर्यथा॥ द्विरददन्तवलक्ष-
मलक्ष्मतस्फुरितशृंगघनं न कुविकेतकी॥ घनघनौघविघट्टनया दिवः कृशशिखं शशिरविडमिव स्मुने॥ अत्र यमक-

याम ७१

नुप्रासौ शब्दालंकारसंसृष्टिं प्रयोजयतः॥ अर्थालंकारसंसृष्टिर्यथा॥ रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया
गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि॥ कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः स-
र्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः॥ अत्र केचित्॥ नास्याः पृथगलंकारत्वं कामिनीदेहे मुक्ताकुण्डलहार
केयूरकङ्कणनूपुराणां स्वस्वशोभाजनकत्वेन नत्वधिकं। समुदायिभ्यः समुदायो नाधिक इति न्यायात्॥ अन्यथा लो-
केऽपि तथा कल्पनप्रसङ्गात्॥ तद्दृष्टौ च गुणालंकारकल्पना दिग्भङ्गः॥ तदसत्॥ अङ्गुलीभिरिव केशसंचयं सन्निगृह्य
तिमिरं मरीचिभिः। कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी॥ अत्रोपमोत्प्रेक्षारूपकैः समासोक्त्या च स-
हसंसृष्टिरत्रशोभातिशयस्यानुभवविकल्पेन संसृष्टेरलंकारान्तरत्वस्य दुर्वारत्वादिति॥ अथ संकरः॥ चमत्कारैक्यस-
वेद्यानामलंकाराणां परस्परमनुग्राह्यानुग्राहकत्वे॥ अयं चमत्कार्यकरूपत्वाद्द्विधा॥ तदुक्तं॥ योगवशादेतेषां ति-
लतण्डुलवद्दुग्धजलवत्॥ व्यक्ताव्यक्तरूपत्वात्संकर उपपद्यते द्विविधं घटति॥ क्रमेण यथा॥ मन्त्रारीमरणे भवान्
किं मां किं किं चाधिरूढा वृषे किं वा नो नवतानि कामविषमा रम्याः पुरो विक्षिप्तां॥ इत्यादौ परमेश्वरा विरहशिवस्येक

...स्थिति स्म किं लोकनिर्माणे न ज्ञातु कुरूपमीर्गैर्भुजंगैः सह॥ अत्र श्लेषव्यतिरेकयोः संकरो व्यक्तः॥ अव्यक्तसंकरो यथा
७२ ...शुवति वेदूर्विंबविमलां लोलः कपोलस्थलिं संप्राप्य प्रसरं क्रमेण कुरुते पीनस्तनास्फालनं॥ कष्टं वैरिव धूर्जन
प्रसमंततं कंठगलत्कज्जलसक्तिं गायन्न करोत्यवारितरसः कामीव बाष्पः पतन्॥ अत्र कपोलस्थलीमिति रूपके कामि
72 ववंदूविंबविमलामिति चोपमा॥ बाष्पकामिनोः साधारणविशेषणयोगात् श्लेषः॥ तावच श्लेषयाव्यापादिता इति प
र्यायः॥ आदिपदात्संदेहोपि॥ स यथा॥ उभयत्र साधकबाधकप्रमाणाभावेन संदेहः संशयालंकारः॥ यथा॥ नयनानी
दहाइंदीर्विंबमतन्मसीदति॥ अधुनापि निरुद्धारामविशीर्णमिदं तमः॥ अत्र किंकामस्योद्दीपकः कालो वर्त्तत इति
भंगीनरेणकथनात्पर्यायोक्तं॥ उतवदनस्येंदुविंबतया अध्यवसानादतिशयोक्तिः किंवा एतादृशेनवक्तैर्निर्दिष्टपत
रूपारोपाद्रूपकं॥ अथवा तयोः समुच्चयविवक्षायां दीपकं॥ अथवा तुल्ययोगिता॥ किमु प्रदोषसमये विशेषणसा
म्यादाननस्यावगतौ समासोक्तिः आहोस्वित् मुखनैर्मल्यप्रस्तावनादप्रस्तुतप्रशंसेति बहूनां संदेहाद्दयमेव संदेहा॥ राम
लंकारः॥ वक्रतस्य॥ ॥उपमाविशेषा एव सम्भवंतीति केचिदलंकारः॥ तथाहि॥ अनन्वयो उपमेयोपमा वोपमातो नातिरि ७२

अत्रैव वानयोरुपमानान्तरस्य विधानाभावश्च मत्कारप्रयोजकः ॥ उपमायां तु सादृश्यमितीति भेद इति वाच्यं ॥ एकस्योपमा
नत्वे उपमेयत्वे तथा प्रतीतावपि उपमानत्वानपायात् ॥ न वा ताद्रूप्ये सतीति विशेषणाद् रूपकात् अनयोर्भेद इति वाच्यं ॥ के
वलाकारसितसाधारणभेदस्यैव विवक्षितत्वात् ॥ कथमन्यथा उपमानत्वोपमेयत्वे एकस्यैवैकवाक्यगे इत्यादिसूत्रे क्षिप्ते
स्यादिति ॥ उत्प्रेक्षायामपि भेदोपमेयकाव्यसर्वस्वत्वादलंकारः उत्प्रेक्षितानुते रूपस्थापि केति ध्येयं ॥ एवं संदेहरूपकादिष्व
पि बोध्यं ॥ एवमपह्नुत्यौ श्लेषसमासोक्त्यौ निदर्शनायामप्रस्तुतप्रशंसायां वस्फुटं भेदोपमामात्रमलंकारत्वं ॥ एवं प्रथमनि
दर्शनोक्तो भेदोपमैवालंकारः ॥ द्वितीयायां व्यतिरेकालंकाररूपदर्शनादुपमैवालंकारः ॥ तृतीयायां संभावितस्योपमैव व
र्णनीया ॥ चतुर्थ्यां विरोधेन गतार्थ्यं ॥ प्रतिवस्तूपमायां स्फुटैवोपमा भेदस्य एवं दृष्टान्तेऽपि ॥ दीपकेऽप्युपमैव ॥ मालादीप
के तु दारतावादिवैलक्षण्ये सत्यर्थगुणस्यैवोत्कर्षहेतुत्वमिति ॥ एवं तुल्ययोगितायामपि ॥ एवं व्यतिरेकस्योदारता
यामुपमायां वा दीर्घ तत्त्वं समुच्चितार्थः ॥ आक्षेपस्याप्येवमेव बोध्यं ॥ एवं विभावनायां विरोधाभासत्वे समुच्चिते ॥ एवं वि
शेषोक्तावपि । ननु विरोधाभासस्य न वक्तव्यत्वात् कथमिति संभवनीतीति चेत् ॥ न ॥ अस्माभिरनंगीकारात् ॥ एवं मया सं

श्री [illegible] ऽर्थगुणेन्तर्भूताः। एवमसंगतेर्विरोधे ऽन्तर्भावः॥ एवं व्याघातस्यात्रैवान्तर्भावः॥ एवं समाधिसमुच्चयाव
७३ पि [illegible]॥ सर्वत्रैवं विषमे ऽप्यतिशयोक्तिरेव प्रमाणत्वेनावतिष्ठते॥ अत एवोक्तं॥ सैषा सर्वत्र वक्रोक्तिरनयार्थो
विभाव्यते॥ यत्नो ऽस्यां कविना कार्यः कोऽलंकारोऽनया विना॥ अथोपमादोषाः॥ हीनत्वमधिकत्वे लिंगभेदो वचनभेदो
[illegible] असंभवः॥ क्रमेण लक्षणोदाहरणानि। जात्या प्रमाणेन धर्मेण वोपमानस्य यान्यूनता तद्धीनत्वं। यथा। चंडाले
[illegible] भिः साहसैः परमैः कृतैः। प्रमाणन्यूनत्वं यथा॥ वह्निस्फुलिंग इव भानुरयं चकास्ति॥ धर्मन्यूनत्वं यथा। स मुनिर्लांछि
[illegible] रूपा जिनपट्टं वहन्॥ व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान्। अत्र मौंजीप्रतिवस्तुनो तडिन्नास्ति। जातिप्र
[illegible] धर्माधिक्यमाधिक्यत्वं। विशालशृंगलयः श्रीग्रंरुद्रा इव महौजसः। यथा॥ पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ। वे
णी [illegible] नरयं कालिंदीजलसंनिभः। तथा। सराशिर्वंबलेर्वक्रे दधु इवोम्मराजत॥ सवाडवाग्निः सावर्तैः स्रोतसा
सिंधुना [illegible]। सवाडवाग्निरित्यस्योपमेये नावाच्यमाधिकं॥ उपमानोपमेययोर्लिंगव्यत्यासो लिंगभेदः। यथा। सैन्या
नि नद्य [illegible] इव जग्मुरनर्गलानि॥ एतेन वचनभेदोऽपि व्याख्यातः। यथा। पद्मानीव लोचनैस्याः पुष्पीपुष्पालिहो यथा॥ अ राम ७३

प्रतीतगुणसादृश्यमसादृश्ये॥ यथा यथाभिकाव्यश्शशिनेवितनार्धरश्मि॥ अनुपपन्नत्वमुपमानस्यासंभवः यथा॥
सकाश्चित्र हन्ते तस्याः स्मितच्छाया विलासिनी॥ अनिन्दुस्यारविंदस्य मध्ये मुग्धेव वेदिका॥ एते वा अनुचितार्थ नेवगतार्थाः॥
एवमन्येप्यलंकारदोषाः सुधीभिरोविलसनावधेयाः॥ उक्ते न्यायांशुवादयएव शब्दाः संभावनेवत्कुमर्हति न तु यत्प्राश
स्त्रि तत्रदुपादानं दोषाः॥ उदाहरणं स्वयमवधेयं॥ समासमभि इकाव्य लक्षणमित्सं संपल्लवितेन॥ ॥यावत्पाठी
रीकद्रवमस्फुरस्या प्रसरसैकेंद्रिलोकी मुग्धेप्रीणाति विप्राणए तिनु नपदः पार्वणशीतमानुः॥ वेगादंभोजजन्माविन
स्फुरस्सिकाः मानवोमां नियावज्ज्ञानाप्तावद्धिधाना मयम पिवस्फुधासिधरानेदकेद॥ ॥घूर्णल्लोचनमुग्धलब्धि हासि
तस्य स्पष्टश्रीरत्नज्वाला जाल मकालुरोषसुदयन्निद्रामाश्रिये॥ जंभारंभमिलन्मिलिंदपटलीवा मीविवाराकुले
कालिंदीजलकेलिपटम हैतालांकमेकेजजे॥ मौलोगंगांबुधारा कुवलयपटली मंडिताः स्थूलपाणेः कोदीश्रृंगीक
इवयानैकरमस्फुरामालिकाकैवरायां॥ कर्पूरस्तोरवंवस्मरगमदपटली पंकसंकाशमूर्तिर्वक्षः पीठेपतंतीह्हि
निधरत्नपानेत्रशोभावनाद्यः॥ ॥श्रीमैथा रामकराख्येनगरमतिलसत्केशवोद्दाम्नधाम प्रख्यातज्ञकीर्तिर्हरतिल

सिंधुरय

भा०
७४

भविस्यति मे करप्रमोद हरीसा तन्नतपोऽनंत देवात्मज इह वसति पुष्कि पुयंसि ... केतस्यां गझस्पोत्सव मतिल
... सिद्धस ॥ ॥ प्रबलकर्कशानर्क दिवारणोल्लसित काव्य कल हाए नानिता ॥ विमल देव तनुजवि
... मतां विततो नुमनोमुदं ॥ ॥ इति श्री विमलदेवतनयविश्वनाथविरचितेसाहित्यसुधासिंधौ अर्था
... नालाह्मसरंग: ॥ ॥ समाप्तोयंग्रंथ: ॥ ॥ कृतिरियं विश्वनाथस्य ॥ ॥ ॥ शुभं भवतु ॥ ॥
... समये पोष शुदि १ वार बृहस्पतिनदिने पुस्तकं लिखितं ॥ ॥ रामो जयति ॥ ॥ राम ॥ ॥
[redacted] । कीर्तिशिशेषं तेने कोर्तुं एं विक्रमस्तु स्तूक्ति । प्रसंज्ञाधिरसन्ने । राम
... ससमक्रोर । एकादश्यां गुरौ स्वीयः स्वधा सिं फकलिखित ॥ पत्तनेचंद्र सूरस्य विभुना थेन ७५
...मता ॥ सो ॥ इदं पुस्तकं लारद्वाजाचंतामणिनाज्ञस्मराब स्वीज्ञानिने दत्तम् ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ध ॥ श्रीरामः ॥

श्रीरामशरणंमम

श्लोक १८२५